**चतुर्थचरणम्, कार्यक्रमः 06**

**पञ्चदिवसीय-ऑनलाइन-राष्ट्रिय-कार्यशाला**

# शिक्षायां साइबरसुरक्षा

**(Cyber Security in Education)**

17-21 **अगस्त** 2020 **पर्यन्तम्**

**संक्षिप्तप्रतिवेदनम्**

भारतसर्वकारस्य शिक्षामन्त्रालयस्य बहुआयामिपरियोजना-**पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षकशिक्षणमिशनमित्यस्य** अन्तर्गतत्वेन स्थापितेन **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये शिक्षणाधिगमकेन्द्रेण** चतुर्थचरणस्य कार्यक्रमाणाम् **'सूचनासम्प्रेषणतकनीकी-आधारितशिक्षणम् आकलनम् च'** इति विषये षष्ठ-पञ्चदिवसीयराष्ट्रियकार्यशालायाः आयोजनम् 2020 तमवर्षस्य अगस्तमासस्य सप्तदशदिनाङ्कात् अगस्तमासस्य एकविंशतितमदिनाङ्कं यावत् कृतम्। कार्यशालायाः मुख्योद्देश्यं प्रतिभागिनां शिक्षायां साइबरसुरक्षासुरक्षितोपायकौशलानां च, ऑनलाइनशैक्षिकसंसाधनानां प्रयोगसम्बद्धे लाइसेंसिंग-कॉपीराइट इत्यस्य सम्प्रत्ययात्मकबोधे अन्तर्दृष्टिः प्रदानम् तथा च विविध-शैक्षिकप्रक्रियायां साइबरसुरक्षाप्रबन्धितकरणसम्बद्ध-कुशलतानां च विकासः करणीयः। ऑनलाइनकार्यशालायाः सञ्चालनं गूगलमीट इत्यस्य मञ्चे कृतम्। उद्घाटनसत्रस्य शुभारम्भः शिक्षणाधिगमकेन्द्रस्य परियोजनाध्यक्षया **प्रो. अमितापाण्डेयभारद्वाजमहोदयया** स्वागतभाषणं कार्यशालायाः सन्दर्भैः च कृतम्। तदोपरान्तम् अध्यक्षीयभाषणं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य माननीयानां कुलपतीनां **प्रो. रमेशकुमारपाण्डेयवर्याणां** च जातम्। **प्रो. के. भरतभूषणवर्येण** (शिक्षासङ्कायप्रमुखः विभागाध्यक्षश्च) धन्यवादज्ञापनेन सत्रसम्पन्नम्। कार्यशालायाः क्रियान्वयनं विशेषरूपेण अभिकल्पितेषु 30 सत्रेषु कृतम्, तेषु उद्घाटन-प्रबोधन-चतुर्दशप्रदर्शनाधारिततकनीकी-प्रश्नोत्तरसत्रम्, पञ्चस्वाभ्यास-ऑनलाइन- आकलन-प्रतिपुष्टि-अनुभवकथनसमापनादीनि सत्राणि जातानि। अन्तिमतिथिपर्यन्तं 347 प्रतिभागिनां पञ्जीकरणं प्राप्तम्, तेषु 262 कार्यशालायाम् आमन्त्रिताः, तथैव 210 प्रतिभागिभिः स्वीयं प्रतिभागस्य प्रतिपुष्टिः प्रदत्तः, परञ्च 184 **प्रतिभागिभिः** कार्यशाला कृता, 26 प्रतिभागिनः व्यक्तिगतकारणेन प्रतिभागं न कृतवन्तः। 184 प्रतिभागीषु भारतस्य 20 राज्येभ्यः 149 प्रतिभागिनः तथा च 02 केन्द्रशासितप्रदेशेभ्यः 35 प्रतिभागिनः आसन्। 20 राज्येभ्यः प्रतिभागिनाम् आन्ध्रप्रदेशतः 07, असमतः 03, बिहारतः 09, छत्तीसगढ़तः 01, गोवातः 02, गुजराततः 02, हरियाणातः 17, झारखण्डतः 04, कर्नाटकतः 04, मध्यप्रदेशतः 03, महाराष्ट्रतः 21, ओडिशातः 05, पंजाबतः 03, राजस्थानतः 17, तमिलनाडुतः 07, तेलङ्गानातः 03, त्रिपुरा 03, उत्तरप्रदेशतः 24, उत्तराखण्डतः 04, पश्चिमबङ्गालतः 10 केन्द्रशासितप्रदेशेभ्यः चण्डीगढ़तः 03, देहलीतः 32 च प्रतिभागिनः आसन्। कार्यशालाविषये निष्णातानां देशस्य प्रतिष्ठितसंस्थानानाम् **पञ्चविशेषज्ञानां** कुशलमार्गदर्शने समस्ततकनीकीसत्राणां सञ्चालनं जातम्। एतेषु सत्रेषु कार्यशालायाः मुख्यविषयाः आसन् ते यथा- शिक्षायां साइबरसुरक्षाः प्रस्तावना, ब्राउसर-ईमेल-सुरक्षितपासवर्डनिर्माणं, वेब-कान्फ्रेसिंग-उपकरणानां कृते साइबरसुरक्षा, विन्डोज् एवं स्मार्टफोन इत्यस्य मूलभूतसुरक्षा, सामाजिक-मीडियासुरक्षा, एन्टीवायरस इत्यस्मिन् प्रयुक्त-अनुप्रयोगः सुरक्षा च, डाटा एवं डॉक्यूमेन्ट्स-सुरक्षा, डाटारिकवरी-उपकरण एवं क्लीनर, गूगलक्लाउडसुरक्षाहेतु उत्तमाभ्यासः, ई-संसाधनस्य सम्बन्धे कॉपीराइट एवं लाइसेंसिंग, अधिगमप्रबन्धनप्रणाल्याधारितसुरक्षायुक्त्या साइबरसुरक्षाहेतु अभ्यासः च। ऑनलाइनपरीक्षणम् अपि प्रशासितम्, तेषु 79% प्रतिभागिनः **षष्टिप्रतिशतात्** अधिकान् अङ्कान् लब्धवन्तः। अन्ते विशेषज्ञानां प्रस्तुतव्याख्यानानां गुणवत्ताविषये ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु कृता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकं** च प्राप्तम्। तथा च तेषां औसतम् 86% 13% 01% एवं 00% क्रमशः श्रेणीषु प्राप्तम्। अनेन साकं कार्यशालायाः सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्ता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकम्, असंतोषजनकं** च। एतेषां 10 बिन्दूनां प्राप्तश्रेण्याम् औसतप्रतिशते 81% **उत्कृष्टम्,** 17% **अति-उत्तमम्,** 02% **उत्तमम्,** 00% **संतोषजनकं** च प्राप्तम्। समापनसत्रे परियोजनाध्यक्षया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तदनु **प्रो. चांदकिरणसलूजावर्याणां** (अध्यक्षः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली) मुख्यातिथीनां सम्बोधनम्, अध्यक्षीयभाषणं **प्रो. रमेशकुमारपाण्डेयवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली) च जातम्। शिक्षासङ्कायप्रमुखस्य धन्यवादज्ञापनेन कार्यशाला सम्पन्नतां गता। कार्यशालायाः समापनान्तरं सफलप्रतिभागिनां ई-चित्रावली, प्रमाणपत्राणि च ई-मेलमाध्यमेन प्रेषितानि।